A.C. Joshi Library
P.U. Chandigarh

MSS No. 161 Subject Philosophy

Name of MSS वैराग्य शतक टीका

Author — —

Period n.d. Folios 004

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios

अथतस्माद्दूषणं बोद्धारइति बोद्धारः ज्ञातारो मत्सरेणगर्वेणग्रस्ताः मत्सरवंतःअसूयिः प्रभवःसमर्थाःस
येनाःहंकारेणदर्पेणदूषिताः अन्येइतरेजनाः अबोधेनअज्ञानेन उपहताः अज्ञानग्रस्ताः अतःसुभाषि
तंकाव्यं अंगेजीर्णंज्ञानन्नकोपिइच्छतिनशृणोति २ चरामीति संसारादुत्पन्नंचरितंकुशलमहंनाऽनुपश्या

बोद्धारोमत्सरग्रस्ताःप्रभवःस्मयदूषिताः अबोधोपहताश्चान्येजीर्णमंगेसुभाषितम् २ नसं।
सारोत्पन्नंचरितमनुपश्यामिकुशलं विपाकःपुण्यानांजनयतिभयंमेविमृशतः महद्भिः
पुण्यौघैः।श्चिरमपिगृहीताश्चविषयामहांतोजायंतेव्यसनमिवदातुंविषयिणाम् ३ ॥

मि मेमम विमृशतः विचारवतःपुण्यानांकामपुण्यानांविपाकःफलंभयं जनयति उत्पादयति एवंस
ति पुण्यौघैर्महद्भिः पुण्यैविषयाश्चिरकालंपरिगृहीताश्च गृहीतास्ते अस्माकंविषयि
णां व्यसनमिवदातुंमहांतोजायंते तान्जनान्मंचन्तीत्यर्थः ३ ॥
श्रीमत्प्रभवेनमः ॥

वै. टी. भ्रांतमिति हे मदीये तृष्णे त्वं अद्यापि न संतुष्यति न संतुष्टा भवसि त्वत्कृते मया यद्यत्कृतं तच्छृणु अनेकैः
२ दुर्गैः कठिनस्थानैर्वनैर्विषमं दुर्गमं एतादृशं देशं भ्रांतं भ्रमितं परंतु किंचिदपि फलं न प्राप्तं अथ च जाति
कुलं च तयोरुचितमभिमानं त्यक्त्वा सेवापि कृता सापि निःफला जाता अन्यस्य परगृहेषु मानेन

भ्रांतं देशमनेकदुर्गविषमं प्राप्तं न किंचित्फलं त्यक्त्वा जातिकुलाभिमानमुचि
तं सेवा कृता निष्फला भुक्तं मानविवर्जितं परगृहेष्वाशंकया काकवत् तृ
ष्णे जृंभसि पापकर्मनिरते नाद्यापि संतुष्यसि ४ ॥ श्रीमत्सम्भवे नमः

मद्दत्वेन विना आशंकया भयेन सह काकवद्भुक्तं भोजनानि कृतानि तथापि त्वं जृंभसि सदोदिता वर्तसे २
हे पापकर्मनिरते पापानि च तानि कर्माणि तेषु निरता रतेति पापकर्माण्यपि का
रितानि नाद्यापि संतुष्यसि ४ ॥

उत्खातमिति देवदत्तस्येयमदपित्वयाकारितंतच्छृणु क्षितितलंनिधीशंकयाउत्खातंसर्वंखनितंतत्रनकिंचित्सा
धं पश्चाद्गिरेः पर्वतस्यधातवः ध्माताः अग्नौपाकीकृताः तत्रनकिंचित्साधं पश्चान्नृपतयोराजानः प्रयत्नेनसे
वयासंतोषिताः तत्रापिफलेनकिंचित्साधं पश्चात्सरितांनदीनांपतिः समुद्रः निस्तीर्णः समुद्रंगत्वास्तवेनउग्र

उत्खातंनिधिशंकयाक्षितितलंध्मातागिरेर्धातवो
निस्तीर्णःसरितांपतिर्नृपतयोयत्नेनसंतोषिताः
मंत्राराधनतत्परेणमनसानीताःश्मशानेनिशाः प्रा
प्तःकाणवराटकोऽपिनमयातृष्णेधुनामुञ्चमाम् ५

मार्गेगतंतत्रापिनकिंचित्साधितम् पश्चान्मनसिमंत्राराधनंकार्यमिति उक्त्वातदपितत्परेणसावधानेनमनसामं
त्राराधनेनश्मशानेतयारात्रयोनीताः क्रमिताः परंतुमयाकाणवराटकाः स्फुटितकपर्दिकोपिनप्राप्तः अधुना
इदानीम् अलंनकिंचित्साध्यं सर्वंसंपन्नं तृष्णे मां मुंच त्यजत्वमेवंकरणीयम् ५ ॥

पत्रा ३/८

वै॰ श॰ हे आशे त्वया अन्यदपि किं कारितं तत्कथय खलानां दुष्टानामाराधने सेवायां तत्परैः अस्माभिः खलोल्लापाः खलानां
३ उत्कृष्टा आलापाः दुष्टवाक्याः सोढाः सहनेनकृताः कथमपि महता कष्टेन किंकृत्वा अंतर्बाष्पं रुदनं निगृह्य आह
मशून्येनमनसा दुर्विनोदहसितमपि कृतम् एवम् प्रतिहताः दुष्टा बुद्धिर्येषां ते प्रतिहतधियस्तेषां खलानां वि

खलोल्लापाः सोढाः कथमपि तदाराधनपरैः नि
गृह्यांतर्बाष्पं हसितमपि शून्येनमनसा कृतश्चि
त्तस्तंभः प्रतिहतधियामंजलिरपि त्वमाशे मो
घाशे किमपरमतो नर्तयसि माम ८ ॥

तत्स्तंभः कृतः मनः समाधानं कृतं अंजलिः प्रणामोऽपि कृतः न किंचित्प्राप्तं अधुना त्वमाशे मोघा निःफला आशा ३
यस्याः सा हे मोघाशे अतः परं मां किं नर्तयसि नृत्यं कारयसि ८ ॥

अमीषामिति तत्तस्मादमीषामेतेषां प्राणानां कृते कारणाय अस्माभिर्गलितः विवेको येषां तैः किं न व्यवसितं किं न कृतं
प्राणानां कृतमेव कथंभूतानां तुलितमुपमितं विसिनीकमलिनीपत्रेभ्यः यः उदकं यैः सह तेषां क्षणभंगुराणां यत यस्मात्

३५ अमीषां प्राणानां तुलितविसिनीपत्रपयसां कृते किं नास्माभिर्विगलितविवेकैर्व्यवसितं यदाढ्यानामग्रे द्रवि
णमदनिःसंज्ञमनसां कृतं व्लानव्रीडैर्निजगुणकथापातकमपि ७ भोगा न भुक्ता वयमेव भुक्तास्तपो
न तप्तं वयमेव तप्ताः कालो न यातो वयमेव यातास्तृष्णा न जीर्णा वयमेव जीर्णाः ८ वलिभिर्मुखमाक्रान्तं
पलितैरंकितं शिरः गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ९ ॥

द्रव्यवतामग्रे विगलिता व्रीडा लज्जा येषां तैः अस्माभिर्निजस्वकीयगुणानां कथाकथनं तदेव पातकं कृतम्
कथंभूतानामाढ्यानां द्रविणं द्रव्यं तस्य मदेन निःसंज्ञं भ्रान्तं मनो येषामिति ॥७॥ भोगा न भुक्ता इति वलिभिर्मुख ॥८॥
माक्रान्तमिति [illegible] ॥८॥ ९॥

वै. टी. निवृत्तेति भोगेच्छानिवृत्ता गता पुरुषबहुमानः अहंकारोपि गलितः समानाः समानवयस्काः स्वःस्वर्गं याताः सु
४ हृदः जीवितसमास्तेपि सपदि गताः अधुना वृद्धत्वे यष्ट्युत्थानेन उत्थानं नेत्रे नयने घनेन निविडेन तिमिरेण रुद्धे अहो अति
आश्चर्यं अयं दुष्टः कायः शरीरं तदपि तथापि मरणमेवापायो नाशस्तेन चकितः भीतः ९ आशेति स्पष्टार्थः अथ वि
षयपरित्यागविदुषां तारश्चिरतरमुषित्वापि विषया वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् व्रजन्तः स्वा ना अव

निवृत्ताः भोगेच्छा पुरुषबहुमानो विगलितः समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः शनैर्यष्ट्युत्थानं
घनतिमिररुद्धे च नयने अहो दुष्टः कायस्तदपि मरणापायचकितः ९ आशा नाम नदी मनोरथजला तृष्णा
तरंगाकुला रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी तस्याः पारगता विशुद्धमनसो नंदंति योगीश्वराः ॥
अवश्यं यातारश्चिरतरमुषित्वापि विषया वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् व्रजंतः स्वातंत्र्यादतु
लपरितापाय मनसः स्वयं त्यक्त्वा ह्येते शमसुखमनंतं विदधति १२ ॥

अवश्यमिति एते विषयाश्चिरतरमुषित्वापि अवश्यं निश्चयेन यातारः गमिष्यंति स्वयं न शक्ता अपि गमिष्यंतीति वियोगे भेदः
कः समानमेवेति एवं सति अयं जनः यत् यस्मात्स्वयं अमून् विषयान्न त्यजति अत्र विशेषोस्ति एते विषयाः स्वातंत्र्या
त् व्रजंतः मनसः अतुलपरितापाय भवंति स्वयं त्यक्तास्चेत् एते अनंतं अपारं शमं सुखं विदधति कुर्वंतीत्यर्थः १२ ॥ ४